**Sisupala-Krishna War at Rajasuya in the Southern Recension**

(From the appendix of Critical Edition (BORI))

*After 2.42.16, S (in N3 after 16a) ins.:*

विहाय परमोद्विग्नाश्चेदिराजं चमूमुखे
तांस्तु विप्रद्रुतान् सर्वान् साश्वपत्तिरथद्विपान् (1)
दारितान् वृष्णिवीरेण त्रासितान् उरुविक्रमान्
कृष्णतेजोहतान् सर्वान् समीक्ष्य वसुधाधिपान् (2)
शिशुपालो रथेनैकः प्रत्युपायात् स केशवम्
रुषा ताम्रेक्षणो राजन् शलभः पावकं यथा (3)
वैशंपायन उवाच
ततो युद्धाय संनद्धं चेदिराजं युधिष्ठिरः
दृष्ट्वा मतिमतां श्रेष्ठो नारदं समुवाच ह (4)
युधिष्ठिर उवाच
अन्तरीक्षे च भूमौ च न तेऽस्त्यविदितं क्वचित्
यानि राजविनाशाय भौमानि च खगानि च (5)
निमित्तानीह जायन्ते उत्पाताश्च पृथग्विधाः
एतदिच्छामि कार्त्स्न्येन श्रोतुं त्वत्तो महामुने (6)
वैशंपायन उवाच
इत्येवं मतिमान् विप्रः कुरुराजस्य धीमतः
पृच्छतः सर्वम् अव्यग्रम् आचचक्षे महायशाः (7)
नारद उवाच
पराक्रमं च मार्गं च संनिपातं समुच्छ्रयम्
आरोहणं कुरुश्रेष्ठ अन्योन्यं प्रति सर्पणम् (8)
रश्मीनां व्यतिसंसर्गं व्यायामं वृत्तिपीडनम्
दर्शनादर्शनं चैव अदृश्यानां च दर्शनम् (9)
हानिं वृद्धिं च ह्रासं च वर्णस्थानं बलाबलम्
सर्वम् एतत् परीक्षेत ग्रहाणां ग्रहकोविदः (10)
भौमाः पूर्वं प्रवर्तन्ते खेचराश्च ततः परम्
उत्पद्यन्ते च लोकेऽस्मिन् उत्पाता देवनिर्मिताः (11)
यदा तु सर्वभूतानां छाया न परिवर्तते
अपरेण गते सूर्ये तत् पराभवलक्षणम् (12)
अच्छाये विमलच्छाया प्रतिच्छायेव लक्ष्यते

यत्र चैत्यकवृक्षाणां तत्र विद्यान् महद् भयम् (13)
शीर्णपर्णप्रवालाश्च शुष्कपर्णाश्च चैत्यकाः
अपभ्रष्टप्रवालाश्च तत्राभावं विनिर्दिशेत् (14)
स्निग्धपत्रप्रवालाश्च दृश्यन्ते यत्र चैत्यकाः
ईहमानाश्च दृष्टाश्च भावस्तत्र न संशयः (15)
पुष्पे पुष्पं प्रजायेत फले वा फलम् आश्रितम्
राजा वा राजमात्रो वा मरणायोपपद्यते (16)
प्रावृट्छरदि हेमन्ते वसन्ते वापि सर्वशः
अकालजं पुष्पफलं राष्ट्रक्षोभं विनिर्दिशेत् (17)
नदीनां स्रोतसोऽकाले द्योतयन्ति महाभयम्
वनस्पतिः पूज्यमानः पूजितोऽपूजितोऽपि वा (18)
यदा भज्येत वातेन भिद्यते नमतेऽपि वा
अग्निवायुभयं विद्याच्छ्रेष्ठो वात्र विनश्यति (19)
दिशः सर्वाश्च दीप्यन्ते जायन्ते राजविभ्रमाः
छिद्यमानो यदा वृक्षो विनदेच्चापि पातितः (20)
सह राष्ट्रं च नदति न तं वृक्षं प्रपातयेत्
अथैनं छेदयेत् कश्चित् प्रतिक्रुद्धो वनस्पतिम् (21)
छेत्ता भेत्ता पतिश्चैव क्षिप्रम् एव विनश्यति
देवतानां च पतनं मण्डपानां च घुट्टनम् (22)
अचलानां प्रकम्पश्च तत् पराभवलक्षणम्
निशि चेन्द्रधनुर् दृष्टं ततोऽपि च महद् भयम् (23)
तद् द्रष्टुरेव भीतिः स्यान् नान्येषां भरतर्षभ
रात्राविन्द्रधनुर् दृष्ट्वा तद् राष्ट्रं परिवर्जयेत् (24)
देवता यत्र नृत्यन्ति नदन्ति च हसन्ति च
उन्मीलन्ति निमीलन्ति राष्ट्रक्षोभं विनिर्दिशेत् (25)
शिला यत्र प्रसिञ्चन्ति स्नेहांश्चोदकसंभवान्
अन्यद् वा विकृतं किं चित् तद् भयस्य निदर्शनम् (26)
म्रियते वा महामात्रो राजा सपरिवारकः
पुरस्य वा भवेद् व्याधी राष्ट्रे देशे च विभ्रमः (27)
देवतानां यदावासे राज्ञां वा यत्र वेश्मनि
भण्डागारायुधागारे निविशेत यदा मधु (28)
सर्वं तद् दाहयेत् स्थानं हन्यमानं बलीयसा
आगन्तुकं भयं तत्र भवेदित्येव निर्दिशेत् (29)
पादपश्चैव यो यत्र रक्तं स्रवति शोणितम्

दन्ताग्रात् कुञ्जरो वापि शृंगाग्राद् वृषभस्तथा (30)
पादपाद् राष्ट्रविभ्रंशः कुञ्जराद् राजविभ्रमः
गोब्राह्मणविनाशः स्याद् वृषभस्येति निर्दिशेत् (31)
छत्रं नरपतेर् यस्य निपतेत् पृथिवीतले
स सराष्ट्रो नरपतिः क्षिप्रम् एव विनश्यति (32)
देवागारेषु वा यत्र राज्ञो वा यत्र वेश्मनि
विकृतं यदि दृश्येत नागावासेषु वा पुनः (33)
तस्य देशस्य पीडा स्याद् राज्ञो जनपदस्य वा
अनावृष्टिभयं घोरं दुर्भिक्षं इति निर्दिशेत् (34)
बाहुभंगे तु देवानां ग्रहस्थानां भयं भवेत्
भग्ने प्रहरणे विद्यात् सेनापतिविनाशनम् (35)
आगन्तुका च प्रतिमा स्थानं यत्र न विन्दति
अभ्यन्तरेण षण्मासाद् राजा त्यजति तत् पुरम् (36)
प्रदीर्यते मही यत्र विनदत्यपि पात्यते
म्रियते तत्र राजा च तच्च राष्ट्रं विनश्यति (37)
एणीपदान् वा सर्पान् वा डुण्डुभान् अथ दीप्यकान्
मण्डूको ग्रसते यत्र तत्र राजा विनश्यति (38)
अभिन्नं वाप्यपक्वं वा यत्रान्नम् उपचीयते
जीर्यन्ते वा म्रियन्ते वा तदन्नं नोपभुज्यते (39)
उदपाने च यत्रापो विवर्धन्ते युधिष्ठिर
स्थावरेषु प्रवर्तन्ते निर्गच्छेच्च पुनस्ततः (40)
अपादं वा त्रिपादं वा द्विशीर्षं वा चतुर्भुजम्
स्त्रियो यत्र प्रसूयन्ते ब्रूयात् तत्र पराभवम् (41)
हस्तिनी महिषी गौर् वा खरोष्ट्रम् अथ सूकरम्
ईदृशानि प्रजायन्ते विद्यात् तत्र पराभवम् (42)
अजैडकाः स्त्रियो गावोऽवयश्चान्येऽपि योनयः
विकृतानि प्रजायन्ते तत्र तत्र पराभवः (43)
नदी यत्र प्रतिस्रोतम् आवहेत् कलुषोदकम्
दिशश्च न प्रकाशन्ते तत् पराभवलक्षणम् (44)
नारद उवाच
एतानि तु निमित्तानि यानि चान्यानि भारत
केशवादेव जायन्ते भौमानि च खगानि च (45)
चन्द्रादित्यौ ग्रहाश्चैव नक्षत्राणि च भारत
वायुरग्निस्तथैवापः पृथिवी च जनार्दनात् (46)

यस्य देशस्य हानिं वा वृद्धिं वा कर्तुमिच्छति
तस्मिन् देशे निमित्तानि तानि तानि करोत्ययम् (47)
योऽसौ चेदिपतेस्तात विनाशः समुपस्थितः
निवेदयति गोविन्दः स्वैर् उपायैर् न संशयः (48)
इयं प्रचलिता भूमिर् अशिवं वान्ति मारुताः
राहुश्चाप्यपतत् सोमम् अपर्वणि विशांपते (49)
सनिर्घाताः पतन्त्युल्कास्तमः संजायते भृशम्
चेदिराजविनाशाय हरिरेष विजृम्भते (50)
वैशंपायन उवाच
एवमुक्त्वा तु भगवान् नारदो विरराम ह
ताभ्यां पुरुषसिंहाभ्यां तस्मिन् युद्ध उपस्थिते (51)
ददृशुर् भूमिपालास्ते घोरान् औत्पातिकान् बहून्
तत्र तैर्दृश्यमानानां दिक्षु सर्वासु भारत (52)
अश्रूयन्त तदा राजन् शिवानामशिवा गिरः
ररास च मही कृत्स्ना सवृक्षपुरपर्वता (53)
अपर्वणि च मध्याह्ने सूर्यं स्वर्भानुरग्रसत्
ध्वजाग्रे चेदिराजस्य सर्वरत्नपरिष्कृते(54)
अपतत् खाच्च्युतो गृध्रस्तीक्ष्णतुण्डः परंतप
आरण्यैः सह संहृष्टा ग्राम्याश्च मृगपक्षिणः (55)
चक्रुशुर् भैरवं तत्र तस्मिन् युद्ध उपस्थिते
एवमादीनि घोराणि भौमानि च खगानि च (56)
औत्पातिकान्यदृश्यन्त संक्रुद्धे शार्ङ्गधन्विनि
वैशंपायन उवाच
महद् विष्फारयन् राजा ततश्चेदिपतिर् धनुः (57)
अभियास्यन् हृषीकेशम् उवाच मधुसूदनम्
एकस्त्वमसि मे शत्रुस्तत् त्वां हत्वाद्य माधव (58)
ततः सागरपर्यन्तां पालयिष्यामि मेदिनीम्
द्वैरथं काङ्क्षितं यन् मे तदिदं पर्युपस्थितम् (59)
चिरस्य बत मे दिष्ट्या वासुदेव सह त्वया
अद्य त्वां निहनिष्येऽहं भीष्मं च सह पाण्डवैः (60)
एवम् उक्त्वा स तं बाणैर् निशितैराप्ततेजनैः
विव्याध युधि तीक्ष्णाग्रैश्चेदिराट् यदुपुङ्गवम् (61)
कण्कपत्रच्छदा बाणाश्चेदिराजधनुश्च्युताः
विविशुस्ते तदा कृष्णं भुजंगा इव पर्वतम् (62)

नाददानस्य चैद्यस्य शरान् अत्यस्यतोऽपि वा
ददृशुस्तेऽन्तरं के चिद् गतिं वायोरिवाम्बरे (63)
चेदिराजमहामेघः शरजालाम्बुमांस्तदा
अभ्यवर्षद् धृषीकेशं पयोद इव पर्वतम् (64)
ततः शार्ङ्गम् अमित्रघ्नं कृत्वा सशरमच्युतः
आबभाषे महाबाहुः सुनीथं परवीरहा (65)
अयं त्वां मामकस्तीक्ष्णश्चेदिराज महाशरः
भेत्तुम् अर्हति वेगेन महाशनिर् इवाचलम् (66)
एवं ब्रुवति गोविन्दे ततश्चेदिपतिः पुनः
मुमोच निशितान् अन्यान् कृष्णं प्रति शरान् बहून् (67)
अथ बाणार्दितः कृष्णः शार्ङ्गमायम्य दीप्तिमान्
मुमोच निशितान् बाणान् शतशोऽथ सहस्रशः (68)
तान् शरांस्तु स चिच्छेद शरवर्षैश्च चेदिराट्
षड्भिश्चान्यैर् जघानाशु केशवं चेदिपुङ्गवः (69)
ततोऽस्त्रं सहसा कृष्णः प्रमुमोच जगत्पतिः
अस्त्रेणैव महाबाहुर् नाशयामास चेदिराट् (70)
ततः शतसहस्रेण शराणां नतपर्वणाम्
सर्वतः समवाकीर्य शौरिं दामोदरं तदा (71)
ननाद बलवान् क्रुद्धः शिशुपालः प्रतापवान्
इदं चोवाच संक्रुद्धः केशवं परवीरहा (72)
अद्याङ्गं मामका बाणा भेत्स्यन्ति तव संयुगे
हत्वा त्वां ससुतामात्यान् पाण्डवांश्च तरस्विनः (73)
आनृण्यम् अद्य यास्यामि जरासंधस्य धीमतः
कंसस्य केशिनश्चैव नरकस्य तथैव च (74)
इत्युक्त्वा क्रोधताम्राक्षः शिशुपालो जनार्दनम्
अदृश्यः शरवर्षेण सर्वतः समवाकिरत् (75)
ततोऽस्त्रेणैव भगवान् अकृन्तत शरान् बहून्
निकृत्य च शरान् सर्वान् अन्तर्धातुं प्रचक्रमे (76)
अन्तर्धानगतौ वीरौ शुशुभाते महाबलौ
साधु साध्विति भूतानि पूजयामासुरम्बरे (77)
न दृष्टपूर्वम् अस्माभिर् युद्धम् ईदृशकं पुरा
ततः कृष्णं जघानाशु शिशुपालस्त्रिभिः शरैः (78)
कृष्णोऽपि बाणैर् विव्याध सुनीथं पञ्चभिर् युधि
ततः सुनीथः सप्तत्या नाराचैरर्दयद् बली (79)

ततोऽतिविद्धः कृष्णेन सुनीथः क्रोधमूर्छितः
विव्याध निशितैर् बाणैर् वासुदेवं स्तनान्तरे (80)
पुनः कृष्णं त्रिभिर् विद्ध्वा ननादावसरे नृपः
ततोऽतिदारुणं युद्धं सहसा चक्रतुः शरैः (81)
तौ नखैर् इव शार्दूलौ दन्तैरिव गजोत्तमौ
दंष्ट्राभिरिव पञ्चास्यौ तुण्डकैर् इव कुक्कुटौ (82)
दारयेतां शरैस्तीक्ष्णैर् अन्योन्यं युधि तावुभौ
ततो मुमुचतुः क्रुद्धौ शरवर्षम् अनुत्तमम् (83)
शरैरेव शरान् छित्त्वा तावुभौ पुरुषर्षभौ
चक्रातेऽस्त्रमयं युद्धं घोरं तदतिमानुषम् (84)
आग्नेयम् अस्त्रं मुमुचे शिशुपालः प्रतापवान्
वारुणेनास्त्रयोगेन नाशयामास केशवः (85)
कौबेरम् अस्त्रं सहसा चेदिराट् प्रमुमोच ह
कौबेरेणैव सहसा नाशयज्जगतः प्रभुः (86)
याम्यम् अस्त्रं ततः क्रुद्धो मुमुचे कालमोहितः
याम्येनैवास्त्रयोगेन याम्यम् अस्त्रं व्यनाशयत् (87)
गान्धर्वेण च गान्धर्वं मानवं मानवेन च
वायव्येन च वायव्यं रौद्रं रौद्रेण चाभिभूः (88)
ऐन्द्रम् ऐन्द्रेण भगवान् वैष्णवेन च वैष्णवम्
एवम् अस्त्राणि कुर्वाणौ युयुधाते महाबलौ (89)
ततो मायां विकुर्वाणो दमघोषसुतो बली
गदामुसलवर्षं तच्छक्तितोमरसायकान् (90)
परश्वथमुसुण्ठीनां पातयामास चेदिराट्
अमोघास्त्रेण भगवान् व्यनाशयत केशवः (91)
शिलावर्षं महाघोरं पातयामास केशवे
वज्रास्त्रेणाभिसंक्रुद्धश्चूर्णम् एवाकरोत् प्रभुः (92)
जलवर्षं ततो घोरं व्यसृजच्चेदिपुंगवः
वायव्यास्त्रेण भगवान् व्याक्षिपच्छतशो हरिः (93)
निहत्य सर्वमायां वै सुनीथस्य जनार्दनः
स मुहूर्तं चकाराशु द्वंद्वयुद्धं महारथः (94)
स बाणयुद्धं कुर्वाणो भर्त्सयामास चेदिराट्
दमघोषसुतो धृष्टम् उवाच यदुनन्दनम् (95)
अद्य कृष्णम् अकृष्णं तु कुर्वन्तु मम सायकाः
इत्येवमुक्त्वा दुष्टात्मा शरवर्षं जनार्दने (96)

मुमोच पुरुषव्याघ्रो घोरमास्थाय तद्वपुः
शरसंकृत्तगात्रस्तु क्षणेन यदुनन्दनः (97)
रुधिरं परिसुस्राव सोऽतीव पुरुषोत्तमः
न यन्ता न रथो वापि न चाश्वाः पर्वतोपमाः (98)
दृश्यन्ते शरसंछन्ना आविग्नम् अभवज्जगत्
केशवं तदवस्थं तु दृष्ट्वा भूतानि चुक्रुशुः (99)
दारुकस्तु तदा प्राह केशवं परवीरहा
नेदृशो दृष्टपूर्वो हि संग्रामो यादृशो मया (100)
स्थातव्यमिति तिष्ठामि त्वत्प्रभावेण माधव
अन्यथा न च मे प्राणा धारयेयुर्जनार्दन (101)
इति संचिन्त्य गोविन्द क्षिप्रमेव वधं कुरु
वैशंपायन उवाच
एवम् उक्तस्तु सूतेन केशवो वाक्यमब्रवीत् (102)
एषह्यतिबलो दैत्यो हिरण्यकशिपुः पुरा
रिपुः सुराणां दैत्येन्द्रो वरदानेन गर्वितः (103)
अथासीद् रावणो नाम राक्षसेन्द्रोऽतिवीर्यवान्
तेनैव बलवीर्येण बलं नागणयन् मम (104)
अहं मृत्युश्च भविता काले काले दुरात्मनः
न भेतव्यं त्वया सूत नैष कश्चिन् मयिस्थिते (105)
इत्येवमुक्त्वा भगवान् ननर्द गरुडध्वजः
पाञ्चजन्यं महाशङ्खं पूरयामास केशवः (106)
संमोहयित्वा भगवांश्चक्रं दिव्यं समाददे
चिच्छेद च सुनीथस्य शिरश्चक्रेण संयुगे (107)